# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (०६)

## ०५.११.२०१२

# पुनरावर्तनम्

- इत्वविधानम्
  - प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः
  - मामकनरकयोरुपसंख्यानम्
  - त्यक्त्यपोश्च
- इत्वनिषेधः
  - न यासयोः
  - त्यकनश्च निषेधः
  - आशिषि वुनश्च न
  - उत्तरपदलोपे न
  - क्षिपकादीनां च न

# पुनरावर्तनम्

- अर्थविशेषे इत्वनिषेधः
    - तारका ज्योतिषि
    - वर्णका तान्तवे
    - वर्तका शकुनौ प्राचाम्
    - अष्टका पितृदेवत्ये

- सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम्

# ४६५. उदीचामातः स्थाने यकपूर्वायाः (७.३.४६)

- चत्वारि पदानि । उदीचाम्, आतः, स्थाने, यकपूर्वायाः ।
- ‘प्रत्ययस्थात्..’ (७.३.४४) इति पूर्णम् अनुवर्तते ।
- यकपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने योऽकारः तस्य कात्पूर्वस्य इद् वा स्याद् आपि परे ।
- ‘केऽणः’ इति ह्रस्वः ।
- आर्यका, आर्यिका ।
- केऽण इति ह्रस्व इति ।
- चटकका, चटकिका ।

- आतः किम् - साङ्काश्ये भवा साङ्काश्यिका ।
- साङ्काश्यिकेति ।

- यक इति किम् - अश्विका ।
- अश्विकेति ।

- स्त्रीप्रत्यय इति किम् - शुभं यातीति शुभंयाः । अज्ञाता शुभंयाः शुभंयिका ।
- शुभंयिकेति ।

# धात्वन्तयकोस्तु नित्यम् (वा)

- धात्वन्तयकारककारयोः उपरि विद्यमानस्य अकारस्य नित्यम् इत्वम्, न तु विकल्पः इत्यर्थः ।
- सुनयिका ।
- सुनयिकेति ।
- सुपाकिका ।

# ४६६. भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि (७.३.४७)

- पदत्रयम् । भस्त्रा-एषा-अजा-ज्ञा-द्वा-स्वा, नञ्पूर्वाणाम्, अपि ।
- 'प्रत्ययस्थात्..' (७.३.४४) इत्यतः 'अतः इत्' इति, 'उदीचामातः..' (७.३.४६) इत्यतः 'उदीचाम्' इति च अनुवर्तते ।
- स्वेत्यन्तं लुप्तषष्ठीकं पदम् ।
- एषामतः इद् वा स्यात् ।
- तदन्तविधिनैव सिद्धे नञ्पूर्वाणामपीति स्पष्टार्थम् ।

- निर्भस्त्रका / निर्भस्त्रिका ।
- एषका / एषिका ।
- कृतषत्वनिर्देशात् नेह विकल्पः - एतिके, एतिकाः ।
- अजका / अजिका ।
- ज्ञका / ज्ञिका ।
- द्वके / द्विके ।
- निःस्वका / निःस्विका ।

- भस्त्राग्रहणम् उपसर्जनार्थम्, अन्यस्य तु उत्तरसूत्रेण सिद्धम् ।
- 'अभाषितपुंस्काच्च' (७.३.४८) इत्युत्तरं सूत्रम् ।
- भस्त्राशब्दस्य नित्यस्त्रीत्वात् तेन सूत्रेण विकल्पः सिध्यति ।
- उपसर्जनत्वे तु अन्यविशेषणत्वात् लिङ्गत्रयेऽपि प्रवृत्तौ भाषितपुंस्कत्वं भवति ।

- एषा द्वा एतयोस्तु सपूर्वयोः न इत्वम् । अन्तर्वर्तिनीं विभक्तिम् आश्रित्य ’असुपः’ इति प्रतिषेधात् ।
- अनेषका । परमैषका ।
- अद्वके । परमद्वके ।
- न सु एतद् सु इति स्थिते अकचि कृते अकचः प्रागेव वा नञ्तत्पुरुषे कृते ‘अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते’ इति न्यायेन त्यदाद्यत्वप्रवृत्तेः प्रागेव सामासिके लुकि विशिष्टात् पुनः सुपि त्यदाद्यत्वे पररूपे च कृते ततः टाप्, स च आद्यसुपः परः इति भावः ।

- न सु एतद् सु ('नञ्' - २.२.६)
- न सु एतकद् सु ('अव्ययसर्वनाम्नामकच् प्राक्टेः' - ५.३.७१)
- न एतकद् ('सुपो धातुप्रातिपदिकयोः' - २.४.७१)
- अ एतकद् ('नलोपो नञः' - ६.३.७३)
- अनेतकद् ('तस्मान्नुडचि' - ६.३.७४)
- अनेतकद् ('कृत्तद्धितसमासाश्च' - १.२.४६)
- अनेतकद् सु ('स्वौजस्..' - ४.१.२)
- अनेतक अ सु ('त्यदादीनामः' - ७.२.१०२)
- अनेतक सु ('अतो गुणे' - ६.१.९७)

- अनेतक (टाप्) आ सु (‘अजाद्यतष्टाप्’ - ४.१.४)
- अनेतका सु (‘अकः सवर्णे दीर्घः’ - ६.१.१०१)
- अनेसका सु (‘तदोः सः सावनन्त्ययोः’ - ७.२.१०६)
- अनेसका (‘हल्ङ्याब्भ्यो…’ - ६.१.६८)
- अनेषका (‘आदेशप्रत्यययोः’ - ८.३.५९)